ॐ

# संस्कृतभारती तेलङ्गाणा

## पत्रालयद्वारा संस्कृतम् - शिक्षापरीक्षा - आगस्त् - २०२३

समयः घण्टात्रयम् | दिनाङ्कः : २७-०८-२०२३

पूर्णाङ्काः १०० | श्रावणशुक्लएकादशी भानुवासरः

---

I (अ) एकस्य श्लोकस्य पदविभागम् अन्वयरचनां च कृत्वा तात्पर्यं स्वभाषया लिखत। (1 x 6 = 6)

1. स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥

२. योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥

(आ) सुभाषितद्वयस्य अन्वयार्थं तात्पर्यं च स्वभाषया लिखत । (2 x 4 = 8)

1. क्वचित्पृथ्वीशय्यः क्वचिदपि च पर्यङ्कशयनः क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः ।
क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरो मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥

2. आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।
मोहावर्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी तस्याः पारगताः विशुद्धमनसो नन्दन्ति योगीश्वराः ॥

3. दिनयामिन्यौ सायं प्रातः शिशिरवसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुः तदपि न मुञ्चत्याशावायुः ॥

II (अ) षण्णां प्रश्नानां उत्तराणि एकैकेन वाक्येन संस्कृतेन लिखत। (6 x 1 = 6)

1. भीष्मः कं पूजार्हं इति अवदत् ?
2. विरलः सरलः जनः कः ?
3. श्रीकृष्णः केन सन्तुष्टः जातः ?
4. रत्नानां राशिः कुत्र आसीत् ?
5. शिवः किमर्थं सन्तुष्टः अभवत् ?
6. इन्द्रकीलपर्वतः किमर्थं पवित्रः ?
7. तपसः प्रभावेण किम् अभवत् ?

(आ) त्रयाणां ससन्दर्भं वाक्यार्थं स्वभाषया लिखत। (3 x 3 = 9)

1. इदानीं जैत्रयात्रा उचिता न तु यज्ञयात्रा
2. तां पूजां स्वीकर्तुं कोऽर्हः, कस्समर्थः
3. तथापि तव वचनं श्रोतुमिच्छामि
4. अर्जुन! शस्त्रं धृत्वा तपस्यां कुरु
5. त्वम् अधुना तरुणः। तथापि तपश्चरसि

(इ) अधो दत्तयोः एकस्य विवरणं दशभिः वाक्यैः संस्कृतभाषया लिखत । (1 x 5 = 5)

1. श्रीकृष्णम् उद्दिश्य शिशुपालस्य दूषणम्
2. अर्जुनस्य तपो भङ्गप्रयत्नः

III (अ) अधो दत्तेषु द्वौ न्यायौ स्वभाषया विवृणुत । (2 x 2 = 4)

1. अन्धपङ्गुन्यायः
2. उष्ट्रलगुडन्यायः
3. अन्धगजन्यायः

(आ) प्रहेलिकाद्वयस्य उत्तरम् अर्थं च स्वभाषया लिखत । (2 x 2 = 4)

1. राजन् ! कमलपत्राक्ष ! तत्ते भवतु चाक्षयम् ।
आसादयति यद्रूपं करेणुः करणैः विना ॥

2. राज्ञः सम्बोधनं किं स्यात् ? सुग्रीवस्य तु का प्रिया ?
अधनास्तु किमिच्छन्ति ? आर्तैः किं क्रियते वद ॥

3. पूजायां किं पदं प्रोक्तं किं वा पुरुषवाचकम् ।
क आयुधतया ख्यातः प्रलम्बासुरविद्विषः ॥

(इ) द्वयोः अभिप्रायं स्वभाषया लिखत । (2 x 1 = 2)

1. सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ।
2. धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ।
3. तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम् ।

IV (अ) एतेषां कृदन्तानाम् इतरवचनानि लिखत । (5 x 1 = 5)

| | | | |
|---|---|---|---|
| 1. | शक्नुवन् | ------------ | ------------ |
| 2. | गायता | ------------ | ------------ |
| 3. | ------------ | ------------ | नश्यन्ति |
| 4. | वहन्त्यै | ------------ | ------------ |
| 5. | ------------ | ------------ | प्रयतमानानाम् |

(आ) आवरणे लिखितानां धातूनाम् उचितैः शतृ-शानजन्तरूपैः रिक्तस्थानानि पूरयत । (6 x 1 = 6)

1. ------------ पत्नीं पतिः आहूतवान् ।(भुङ्क्ते)
2. दूरदर्शनं -------- पुत्रं जनकः तर्जितवान् ।(पश्यति)
3. भक्ताः जपं ------------ आनन्दम् अनुभवन्ति । (करोति)
4. वेगेन ------------ यानात् मम भीतिः । (आगच्छति)
5. कार्यं ------------ कर्मकर्यः अधिकं धनम् इष्टवत्यः । (कुरुते)
6. तत्र ------------ भक्तः एव श्रीकरः। (वन्दते)

(इ) ''सत्सप्तमी'' प्रयोगेण पञ्च वाक्यानि लिखत । (5 x 1 = 5)

1. शिक्षकः आगच्छति । छात्राः उत्थितवन्तः ।
2. रामः गच्छति । दशरथः अपतत् ।
3. यदा माता पुत्रं स्मरन्ती आसीत् तदा पुत्रः आगतवान्
4. यदा वृष्टिः आगता तदा वस्त्राणि आर्द्राणि ।
5. भवनं पतितम् । जनाः धावितवन्तः ।
6. पाठः पाठ्यमानः । सम्भाषणं न करणीयम् ।

(ई) योजयत । (8 x ½ = 4)

1. गच्छता — अ. छात्रेभ्यः
2. हसन्तीषु — आ. वृद्धायाः
3. कुर्वताम् — इ. पुत्रे
4. धावद्भ्यः — ई. बालिकासु
5. पठ्यमाने — उ. कर्मकराणाम्
6. खिद्यमानायाः — ऊ. लेखाम्
7. दीयमानाम् — ऋ. वाहनेन
8. आगतवति — ॠ. पुस्तके

V (अ) अधो दत्तेषु पञ्चानां सन्धिं विभज्य सन्धि नाम लिखत । (5 x 1 = 5)

1) हरिश्शेते  2) वक्रश्चलति  3) बृहट्टीका
4) षड्ढयाः  5) गच्छच्छात्रः  6) पूर्वस्मिन्नध्याये

(आ) अधो दत्तेषु पञ्चानां सन्धिं कृत्वा सन्धि नाम लिखत । (5 x 1 = 5)

1) प्राक् + एव  2) तत् + लयः  3) अनुष्टुब् + छन्दः
4) हसन् + अवदत्  5) त्वक् + मोचनम्  6) कन्यास् + षोडश

(इ) संयोज्य केन नियमेन विसर्गसन्धिः अभवत् इति वदत । (4 x 1 = 4)

1) तुमुलः + अभवत्  2) बुद्धिः + विस्तृता  3) धनुः + टङ्कारः  4) पुनः + अपि

VI (अ) गणे अनर्हं पदं पृथक्कुरुत । (4 x ½ = 2)

1) पठन्, कल्पमानः, धावन्, गच्छन्
2) वदन्ती, स्वदमाना, नृत्यन्ती, लभमानः
3) लक्ष्मी, सरस्वती, शची, गौरी
4) अमरावती, पूरी, द्वारका, काशी

(आ) अधो दत्तेषु पञ्च पदानि प्रयुज्य वाक्यानि संस्कृतेन लिखत । (5 x 1 = 5)

1) गच्छता  2) आनयन्तीम्  3) लम्बमानम्  4) उक्त्वा
5) कुर्वन्  6) क्रीणती  7) कथ्यते

(इ) पञ्च वाक्यानि संस्कृतेन अनुवदत । (5 x 1 = 5)

1. అరవిందుడు పాటను వింటూ చిత్రాన్ని గీస్తున్నాడు.
   Aravind is drawing a picture while listening to a song.
   अरविन्द गाना सुनते हुऐ चित्र बना रहा है।

2. పోలీసులు దొంగిలిస్తూవున్న దొంగను బంధించారు.
   The police arrested the thief who was stealing.
   चोरी करनेवाले चोर को पुलिस ने किया गिरफतार।

3. నారదుడు మ్రొక్కుతున్న ధ్రువుని లేపాడు.
Narada raised Dhruva who has been bowing.
नरद ने कराहते ध्रुव को जगाया ।

4. పారిపోతున్న మిత్రుడు వేగముగా పరుగెత్తుతున్నాడు.
The fleeing friend is running fast.
भाग रहा दोस्त तेजी से भाग रहा है।

5. నీళ్ళను తెస్తూవున్న సీతను శారదకూడా అనుసరించినది.
Sharada also followed Sita who is bringing water.
शरदा भी जल लेकर आती हुई सीता के पीछे-पीछे चलीं ।

6. ఆడుతున్న పిల్లలచేత గొప్ప సందడి చేయబడినది.
A great noise was made by the playing children.
बच्चों ने खेलते हुए खूब शोर मचाया ।

(ई) पञ्च वाक्यानि स्वभाषया अनुवदत । (5 x 1 = 5)

1. सूर्ये अस्तं गते (सति) वयं गृहं प्रत्यागतवन्तः ।
2. कपिषु पश्यत्सु (सत्सु) हनूमान् समुद्रलङ्घनं कृतवान् ।
3. कार्यं कुर्वाणैः सर्वैरपि प्रायः फलं लभ्यते एव ।
4. भक्ष्याणि खादन्तीभिः स्त्रीभिः बहु सम्भाषणं कृतम् ।
5. श्रीधरः पादत्राणं क्रीणन् धनस्यूतात् धनं स्वीकृतवान् ।
6. स्पर्धार्थं गच्छताम् एतेषां जयः निश्चितः ।

(उ) अधोलिखितं गद्यभागं पठित्वा दत्तानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत । (5 x 1 = 5)

पट्टाभिः एकः महाकृपणः। मरणानन्तरं सः साक्षात् स्वर्गद्वारसमीपं गतवान्। द्वारपालाः तं दृष्ट्वा आश्चर्येण उक्तवन्तः - ''भवतः अत्र आगमनं कथम्? यमदूताः प्रायः भ्रान्त्या अत्र प्रेषितवन्तः। भवान् किं पुण्यकार्यं कृतवान्?'' इति ।

पट्टाभिः कोपेन उक्तवान् - 'एकवारं देवस्य उत्सवसमये मार्गे एका पैसा लब्धा आसीत्। तच्च भिक्षुकस्य कृते दत्तवान् आसम्। तस्य पुण्यकार्यस्य विवरणं सर्वं चित्रगुप्तस्य पुस्तके अस्ति । आवश्यकं चेत् तं पृच्छतु' इति।

द्वारपालाः पट्टाभिं चित्रगुप्तसमीपं नीतवन्तः। सर्ववृत्तान्तम् अपि चित्रगुप्ताय निवेदितवन्तः। चित्रगुप्तः उक्तवान् - ''पैसादानेन लब्धेन पुण्येन एव भवान् स्वर्गस्य दर्शनं कृतवान्। इतःपरं भवतः कृते नरकः एव'। तदा यमभटाः पट्टाभिं नरकलोकं नीतवन्तः।

1. पट्टाभिः कीदृशः?
2. स्वर्गस्य द्वारपालाः पट्टाभिं किम् पृष्टवन्तः?
3. कस्मात् कारणात् पट्टाभिः स्वर्गलोकं आनीतः?
4. पट्टाभेः पुण्यकार्यस्य विवरणं कुत्रास्ति ?
5. चित्रगुप्तः किम् उक्तवान् ?

**जयतु संस्कृतम् । जयतु भारतम् ।**